ODM EDUCATIONAL GROUP
Changing your Tomorrow

# संस्कृतम्

CHANGING YOUR TOMORROW

# द्वितीयः पाठः

## स्वर्णकाकः

इत्युक्त्वा काकः कक्षाभ्यन्तरात् तिस्रः मञ्जूषाः निस्सार्य तां प्रत्यवदत्- "बालिके! यथेच्छं गृहाण मञ्जूषामेकाम्।" लघुतमां मञ्जूषां प्रगृह्य बालिकया कथितम् इयत् एव मदीयतण्डुलानां मूल्यम्।

गृहमागत्य तया मञ्जूषा समुद्घाटिता, तस्यां महार्हाणि हीरकाणि विलोक्य सा प्रहर्षिता तद्दिनाद्धनिका च सञ्जाता।

ODM EDUCATIONAL GROUP
Changing your Tomorrow



ODM EDUCATIONAL GROUP
Changing your Tomorrow

तस्मिन्नेव ग्रामे एका अपरा लुब्धा वृद्धा न्यवसत्। तस्या अपि एका पुत्री आसीत्। ईर्ष्यया सा तस्य स्वर्णकाकस्य रहस्यम् ज्ञातवती। सूर्यातपे तण्डुलान् निक्षिप्य तयापि स्वसुता रक्षार्थं नियुक्ता। तथैव स्वर्णपक्षः काकः तण्डुलान् भक्षयन् तामपि तत्रैवाकारयत्। प्रातस्तत्र गत्वा सा काकं निर्भर्त्सयन्ती प्रावोचत्–"भो नीचकाक! अहमागता, मह्यं तण्डुलमूल्यं प्रयच्छ।" काकोऽब्रवीत्–"अहं त्वत्कृते सोपानम् अवतारयामि। तत्कथय स्वर्णमयं रजतमयं ताम्रमयं वा।" गर्वितया बालिकया प्रोक्तम्–"स्वर्णमयेन सोपानेन अहम् आगच्छामि।" परं स्वर्णकाकस्तत्कृते ताम्रमयं सोपानमेव प्रायच्छत्। स्वर्णकाकस्तां भोजनमपि ताम्रभाजने एव अकारयत्।

प्रतिनिवृत्तिकाले स्वर्णकाकेन कक्षाभ्यन्तरात् तिस्रः मञ्जूषाः तत्पुरः समुत्क्षिप्ताः। लोभाविष्टा सा बृहत्तमां मञ्जूषां गृहीतवती। गृहमागत्य सा तर्षिता यावद् मञ्जूषामुद्घाटयति तावत् तस्यां भीषणः कृष्णसर्पो विलोकितः। लुब्धया बालिकया लोभस्य फलं प्राप्तम्। तदनन्तरं सा लोभं पर्यत्यजत्।

ODM
EDUCATIONAL GROUP
Changing your Tomorrow



ODM
EDUCATIONAL GROUP
Changing your Tomorrow

## अतिरिक्त प्रश्ना:

(i) केन तिस्त्र: मञ्जुषा: कन्याया: पुर: समुक्षिप्ता:

(ii)लुब्धया वालिकाया किम् प्रात्पम्

(iii) लोभा विष्टा सा कन्या कीदृशीं मञ्जुषां गृहीतवती

(iv) गृहमागत्य यदा सा तर्षिता गञ्जुषाम् उद्घाटयति तदा कं विलोकयति ?

**सन्धिविच्छेदं :-**

लोभाविष्टा, पर्यत्यजत्, तदन्तरम्

ODM EDUCATIONAL GROUP
Changing your Tomorrow

**प्रकृति प्रत्यय :-**

आगत्य, लुब्धाया, विलोक्य, तर्षिता, गृहीतवती

**विशेषण – विशेष्य**

तिस्त्र: – मञ्जुषा:

लोभाविष्टा: – सा

तर्षिता – सा

भीषण: – कृष्णसर्प:

लुब्धया – बालिकया

ODM
EDUCATIONAL GROUP
Changing your Tomorrow

**गृहकार्यम्-**

विषयान्तर्गत  प्रश्नानाम् उत्तराणि लिखित्वा आनय।

ODM EDUCATIONAL GROUP
Changing your Tomorrow

# धन्यवाद:

## ओ.डि.एम्. एजुकेशनल ग्रुप्

ODM EDUCATIONAL GROUP
Changing your Tomorrow